नं० ४३०४-घ

(बालप्रकाप्राचतुर्थाध्यायः)

नं० ४३०४-घ

पत्राणि ३ (त्रीणि)

4303

F. 3.



बाल० च० श्रीगणेशाय नमः ॥ ॥ चतुर्थे प्रयोजकाप्रयोजकौ निरूपितौ। तत्र प्रयोजकोऽपि सप्तधा। अप्रयोजको
१ ऽपि सप्तधा। तथा हि। कश्चिदुत्पत्तेरपि प्रयोजक उपादानस्यापि पालनस्यापि। यथाग्नेययागामिक्षायागा
देर्यथाक्रमम् अष्टाकपालामिक्षादेः। कश्चित्तु त्रितयस्याप्यप्रयोजको यथा तुषोपवापः कपालस्योत्पत्तेः
प्रयोजको नोपादानस्य न च पालनस्य तस्य पुरोडाशार्थमेवोत्पन्नमुपात्तं पालितं च कपालं साधनत्वेन गृ
ह्णाति॥ कश्चित्तु उत्पत्तेरप्रयोजकस्तूपादानपालनयोस्तु प्रयोजको यथाक्षाभ्यंजनं न पांशूनामुत्पत्तेः प्र
योजकं स्वत एव तत्सत्त्वात् सिद्धानां तेषां परिग्रहरूपोपादानस्य प्रयोजकं पालनस्य च। एवं प्रातर्दोहयागो
ऽपि अशितपीतोत्पन्नस्यैवोधःस्थितदुग्धस्य दोहनरूपमुपादानं पालनं च प्रयुंक्ते। वाजिनयागोऽपि वाजिनो
त्पत्तेरप्रयोजकस्तस्यामिक्षार्थदध्यानयनाधीनत्वात्। वाजिनोपादानपालनयोस्तु प्रयोजक एव। कश्चि राम०
त्तूत्पत्तेः प्रयोजको नोपादानपालनयोर्यथामिक्षा वाजिनोत्पत्तेः प्रयोजिका नोपादानपालनयोः। एवं स्वर्गो १

दिफलं यागोत्पत्तेरेव प्रयोजकं न यागोपादानपालनयोः उत्पत्तिव्यतिरिक्तयागोपादानासंभवात्। स्तोक
स्य च पालनासंभवात्। कश्चित्तूत्पत्त्युपादानयोर्न प्रयोजकः पालनमात्रस्य तु प्रयोजको यथा स्विष्टकृद्यागा
दिः शेषस्य। कश्चित्तूपादानस्यैव प्रयोजको नोत्पत्तिपालनयोर्यथा पात्रासादनपदनिधाने स्राम्भंजनमसंस्कृ
तपांसूपादानस्यैव प्रयोजकं न पांसूत्पत्तिपालनयोः। एवं चरौ तुषोपवापो दृषदुपादानस्यैव प्रयोजको न तदुत्प
त्तेः पालनस्य वा। एवमाग्नेयादियागो देवतापात्रद्रव्यात्मकोपादानस्यैव प्रयोजको न देवतोत्पत्तेस्तत्पालन।
स्य वा। कश्चित्तूत्पत्तिपालनयोरेव प्रयोजको न तदुपादानस्य। यथा स्वर्गादिफलमपूर्वस्योत्पत्तेः प्रयोजकं पाल
नस्यापि धर्मनाशककर्मनाशाजलस्पर्शादौ हि कृते स्वर्गानुत्पत्तेः। न तूत्पत्तिव्यतिरिक्तं किंचिदस्त्यपूर्वस्योपादानं
यत्स्वर्गादिना फलेन प्रयुज्येत॥ कश्चित्तूत्पत्त्युपादानयोरेव प्रयोजको न पालनस्य। यथाग्नीषोमीयविकारे नि
रूढपशावस्ति दीक्षितेमैत्रावरुणाय दण्डदानेन दण्डोत्पत्त्युपादानयोः प्रयोजकं न तत्पालनस्यापूर्वत्वविद्यमान

का॰ ल॰ व॰ त्वात्तस्येति॥ एवंप्रयोजकोप्याद्यभेदस्य तृतीयादिभेदानां च गणनया समविधः। अप्रयोजकोपि द्वितीयस्य तृ
२ तीयादिभेदानां च गणनया समविध इति सिद्धं॥ ॥पुनरपि प्रयोजको द्विविधः कश्चित्स्वार्थं प्रयुंक्ते यथा शेषी
स्वर्गादिः शेषं यागादिकं स्वार्थं प्रयुंक्ते न परार्थं। कश्चित्तु परार्थं किंचित्प्रयुंक्ते न स्वार्थं। यथा निमित्तं जावनभे
2 दनादि अशेषिभूतं दर्शादिकं भेदनहोमादिकं च न स्वार्थं प्रयुंक्ते किंतु पापक्षयकृत्त्वप्रकारादिशेषार्थं प्रयुं
क्ते। तदुक्तमाचार्यैः। तथा होमाः प्रयुज्यंते भेदनस्कंदनादिभिः। निमित्तैर्न च तेषां होमानां शेषतामतेनि॥॥
अप्रयोजकोपि पुनर्द्विवि—। कश्चित्स्वांगस्याप्यप्रयोजको यथानुषोपवापः कपालस्य स्वांगभूतस्याप्यप्र
योजकः। कश्चित्तु परांगस्य स्वोपकारिणोप्यप्रयोजकः यथा दध्यानयनस्य वाजिनयागः। यथा वा साभ्यंजनं
एकहायनीनयनसाध्यमपि न तस्य प्रयोजकं। यथा वा प्रतिपत्तिशाकस्मादि तन्निरसनस्विष्टकृद्यागचा— राम
त्वप्रसनादिः प्रतिपाद्यस्य शाद्दत्सोहितर शेषस्य कृत्स्नविषाणादेश्चाप्रयोजकाः तथा प्रसंग्यपि पशुपुरो २

डाशयागादिः प्रसंगः॥ ॥इति प्रयोजन — प्रयोजकभेदनिरूपणं॥ ॥स्वप्रयाजादेः स्वोपकारिणोऽप्रयोज-
क॥ अप्रयोजकादिलक्षणं भाष्ये। साधारणं भवेत्तंत्रं परार्थत्वप्रयोजकः। एवमेव प्रसंगः स्याद्विद्यमाने स्वके
विधाविति। अस्यार्थः। साधारणां अनेकेषां यत्र प्रयोजकत्वशक्तिरस्ति तत्तंत्रं। यथा प्रयाजादेः सकृदनुष्ठानेन त-
द्विषयास्वनेकेषामाग्नेयादीनां प्रयोजकत्वशक्तिरस्ति। परार्थत्वप्रयोजकः अत्र परार्थे परमात्रार्थ इत्यर्थः अन्य-
थातंत्रेऽतिप्रसंगात्। एवमपि पुरोडाशकपाले अव्याप्तिः कपालेषु श्रपयतीति समस्यापरस्मिन् श्रपणाद्वकपा-
लानां पुरोडाशकपालेनेतिकर्तव्यतानुष्ठोपवापेऽपितात्पर्यात्। अतः परार्थ इत्यस्य परमात्रप्रयुक्त इत्यर्थः। ए-
वमेव प्रसंगः स्यादित्युक्ते कात्स्न्येन प्रयोजकप्रसंगयोर्भेद इत्यत उक्तं विद्यमाने स्वके विधाविति। यद्यपि भट्टेन
येपशुपुरोडाशे प्रसंगोपकारिप्रयाजादेरनंगत्वात्तदंशे पुरोडाशीयोऽतिदेशः प्रयोगवचनश्चकल्प्यते तथा-
पि पिष्टलेपफलीकरणाज्यभागादिसाधारणेन तावत्प्रयाजादिप्रयुक्तिसमर्थो विधिरस्तिवाजिनादिवि

बा ल० च० धिस्तुवाजिनाछोवविषयाकरोतिनचतस्यतत्रप्रयोजकशक्तिरस्तिअन्यत्तुकिंचिन्नैवासौविषयाकरोतीति
२ निर्वैषम्यमित्यर्थः। अत्रैवार्थेद्वादशाध्यायाद्यभाष्यगतस्यएतत्श्लोकमाख्यानग्रंथस्यतात्पर्यंवर्णनीयं॥
इतितंत्रप्रसंगाप्रयोजकलक्षणनिरूपणं॥ ॥

४५

3

एम०
२